# ऋग्वेद-संहिता । मण्डलं ३

3.001.01a सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।

3.001.01c देवाँ अच्छा दीद्यद्युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥

3.001.02a प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।

3.001.02c दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥

3.001.03a मयो दधे मेधिरः पूतदक्षो दिवः सुबन्धुर्जनुषा पृथिव्याः ।

3.001.03c अविन्दन्नु दर्शतमप्स्व१न्तर्देवासो अग्निमपसि स्वसृणाम् ॥

3.001.04a अवर्धयन्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा ।

3.001.04c शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन् ॥

3.001.05a शुक्रेभिरङ्गै रज आततन्वान्क्रतुं पुनानः कविभिः पवित्रैः ।

3.001.05c शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥

3.001.06a वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः ।

3.001.06c सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥

3.001.07a स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम् ।

3.001.07c अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥

3.001.08a बभ्राणः सूनो सहसो व्यद्यौद्दधानः शुक्रा रभसा वपूंषि ।

3.001.08c श्चोतन्ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन ॥

3.001.09a पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः ।

3.001.09c गुहा चरन्तं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव ॥

3.001.10a पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः ।

3.001.10c वृष्णे सपत्नी शुचये सबन्धू उभे अस्मै मनुष्ये३ नि पाहि ॥

3.001.11a उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः ।

3.001.11c ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणाम् ॥

3.001.12a अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः ।

3.001.12c उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ॥

3.001.13a अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपम् ।

3.001.13c देवासश्चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन् ॥

3.001.14a बृहन्त इद्भानवो भाऋजीकमग्निं सचन्त विद्युतो न शुक्राः ।

3.001.14c गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥

3.001.15a ईळे च त्वा यजमानो हविर्भिरीळे सखित्वं सुमतिं निकामः ।

3.001.15c देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः ॥

3.001.16a उपक्षेतारस्तव सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।

3.001.16c सुरेतसा श्रवसा तुञ्जमाना अभि ष्याम पृतनायूँरदेवान् ॥

3.001.17a आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।

3.001.17c प्रति मर्ताँ अवासयो दमूना अनु देवान्रथिरो यासि साधन् ॥

3.001.18a नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।

3.001.18c घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥

3.001.19a आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ।

3.001.19c अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः ॥

3.001.20a एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचम् ।

3.001.20c महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन्निहितो जातवेदाः ॥

3.001.21a जन्मञ्जन्मन्निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः ।

3.001.21c तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥

3.001.22a इमं यज्ञं सहसावन्त्वं नो देवत्रा धेहि सुक्रतो रराणः ।

3.001.22c प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणमा यजस्व ॥

3.001.23a इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।

3.001.23c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

3.002.01a वैश्वानराय धिषणामृतावृधे घृतं न पूतमग्नये जनामसि ।

3.002.01c द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः समृण्वति ॥

3.002.02a स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत्पुत्र ईड्यः ।

3.002.02c हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः ॥

3.002.03a क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः ।

3.002.03c रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे ॥

3.002.04a आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियम् ।

3.002.04c रातिं भृगूणामुशिजं कविक्रतुमग्निं राजन्तं दिव्येन शोचिषा ॥

3.002.05a अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः ।

3.002.05c यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम् ॥

3.002.06a पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः ।

3.002.06c अग्ने दुव इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥

3.002.07a आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।

3.002.07c सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥

3.002.08a नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।

3.002.08c रथीर्ऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥

3.002.09a तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः ।

3.002.09c तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥

3.002.10a विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्स्वधितिं न तेजसे ।

3.002.10c स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥

3.002.11a स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः ।

3.002.11c वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥

3.002.12a वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भन्दमानः सुमन्मभिः ।

3.002.12c स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्यैति जागृविः ॥

3.002.13a ऋतावानं यज्ञियं विप्रमुक्थ्य१मा यं दधे मातरिश्वा दिवि क्षयम् ।

3.002.13c तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे ॥

3.002.14a शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।

3.002.14c अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥

3.002.15a मन्द्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिम् ।

3.002.15c रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥

3.003.01a वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।

3.003.01c अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥

3.003.02a अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।

3.003.02c क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥

3.003.03a केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः ।

3.003.03c अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्सुम्नानि यजमान आ चके ॥

3.003.04a पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् ।

3.003.04c आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥

3.003.05a चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।

3.003.05c विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥

3.003.06a अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ।

3.003.06c रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥

3.003.07a अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।

3.003.07c वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥

3.003.08a विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् ।

3.003.08c अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥

3.003.09a विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।

3.003.09c तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥

3.003.10a वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण ।

3.003.10c जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥

3.003.11a वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।

3.003.11c उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥

3.004.01a समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः ।

3.004.01c आ देव देवान्यजथाय वक्षि सखा सखीन्सुमना यक्ष्यग्ने ॥

3.004.02a यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।

3.004.02c सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥

3.004.03a प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।

3.004.03c अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥

3.004.04a ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।

3.004.04c दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥

3.004.05a सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन ।

3.004.05c नृपेशसो विदथेषु प्र जाता अभी३मं यज्ञं वि चरन्त पूर्वीः ॥

3.004.06a आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे ।

3.004.06c यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः ॥

3.004.07a दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।

3.004.07c ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥

3.004.08a आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।

3.004.08c सरस्वती सारस्वतेभिरर्वाक्तिस्रो देवीर्बर्हिरेदं सदन्तु ॥

3.004.09a तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।

3.004.09c यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥

3.004.10a वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।

3.004.10c सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥

3.004.11a आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।

3.004.11c बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥

3.005.01a प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम् ।

3.005.01c पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥

3.005.02a प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भि स्तोतॄणां नमस्य उक्थैः ।

3.005.02c पूर्वीरृतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥

3.005.03a अधाय्यग्निर्मानुषीषु विक्ष्व१पां गर्भो मित्र ऋतेन साधन् ।

3.005.03c आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनाम् ॥

3.005.04a मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।

3.005.04c मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥

3.005.05a पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।

3.005.05c पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥

3.005.06a ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।

3.005.06c ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥

3.005.07a आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।

3.005.07c दीद्यानः शुचिरृष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥

3.005.08a सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।

3.005.08c आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥

3.005.09a उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ।

3.005.09c मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥

3.005.10a उदस्तम्भीत्समिधा नाकमृष्वो३ऽग्निर्भवन्नुत्तमो रोचनानाम् ।

3.005.10c यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥

3.005.11a इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।

3.005.11c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

3.006.01a प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।

3.006.01c दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥

3.006.02a आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।

3.006.02c दिवश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥

3.006.03a द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।

3.006.03c यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ॥

3.006.04a महान्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः ।

3.006.04c आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥

3.006.05a व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।

3.006.05c त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥

3.006.06a ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।

3.006.06c अथा वह देवान्देव विश्वान्स्वध्वरा कृणुहि जातवेदः ॥

3.006.07a दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।

3.006.07c अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥

3.006.08a उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।

3.006.08c ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥

3.006.09a ऐभिरग्ने सरथं याह्यर्वाङ्नानारथं वा विभवो ह्यश्वाः ।

3.006.09c पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥

3.006.10a स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।

3.006.10c प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥

3.006.11a इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।

3.006.11c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

3.007.01a प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।

3.007.01c परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ॥

3.007.02a दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ।

3.007.02c ऋतस्य त्वा सदसि क्षेमयन्तं पर्येका चरति वर्तनिं गौः ॥

3.007.03a आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान्रयिविद्रयीणाम् ।

3.007.03c प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः ॥

3.007.04a महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति ।

3.007.04c व्यङ्गेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश ॥

3.007.05a जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।

3.007.05c दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥

3.007.06a उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम् ।

3.007.06c उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥

3.007.07a अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ।

3.007.07c प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥

3.007.08a दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।

3.007.08c ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥

3.007.09a वृषायन्ते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः ।

3.007.09c देव होतर्मन्द्रतरश्चिकित्वान्महो देवान्रोदसी एह वक्षि ॥

3.007.10a पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः ।

3.007.10c उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥

3.007.11a इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।

3.007.11c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

3.008.01a अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।

3.008.01c यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥

3.008.02a समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरं सुवीरम् ।

3.008.02c आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय ॥

3.008.03a उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि ।

3.008.03c सुमिती मीयमानो वर्चो धा यज्ञवाहसे ॥

3.008.04a युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ।

3.008.04c तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः ॥

3.008.05a जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।

3.008.05c पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम् ॥

3.008.06a यान्वो नरो देवयन्तो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।

3.008.06c ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषन्तु रत्नम् ॥

3.008.07a ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ।

3.008.07c ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ॥

3.008.08a आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।

3.008.08c सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ॥

3.008.09a हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।

3.008.09c उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ॥

3.008.10a शृङ्गाणीवेच्छृङ्गिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम् ।

3.008.10c वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ॥

3.008.11a वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।

3.008.11c यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥

3.009.01a सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।

3.009.01c अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम् ॥

3.009.02a कायमानो वना त्वं यन्मातॄरजगन्नपः ।

3.009.02c न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥

3.009.03a अति तृष्टं ववक्षिथाथैव सुमना असि ।

3.009.03c प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये असि श्रितः ॥

3.009.04a ईयिवांसमति स्रिधः शश्वतीरति सश्चतः ।

3.009.04c अन्वीमविन्दन्निचिरासो अद्रुहोऽप्सु सिंहमिव श्रितम् ॥

3.009.05a ससृवांसमिव त्मनाग्निमित्था तिरोहितम् ।

3.009.05c ऐनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परि ॥

3.009.06a तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन ।

3.009.06c विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥

3.009.07a तद्भद्रं तव दंसना पाकाय चिच्छदयति ।

3.009.07c त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥

3.009.08a आ जुहोता स्वध्वरं शीरं पावकशोचिषम् ।

3.009.08c आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥

3.009.09a त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।

3.009.09c औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥

3.010.01a त्वामग्ने मनीषिणः सम्राजं चर्षणीनाम् ।

3.010.01c देवं मर्तास इन्धते समध्वरे ॥

3.010.02a त्वां यज्ञेष्वृत्विजमग्ने होतारमीळते ।

3.010.02c गोपा ऋतस्य दीदिहि स्वे दमे ॥

3.010.03a स घा यस्ते ददाशति समिधा जातवेदसे ।

3.010.03c सो अग्ने धत्ते सुवीर्यं स पुष्यति ॥

3.010.04a स केतुरध्वराणामग्निर्देवेभिरा गमत् ।

3.010.04c अञ्जानः सप्त होतृभिर्हविष्मते ॥

3.010.05a प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् ।

3.010.05c विपां ज्योतींषि बिभ्रते न वेधसे ॥

3.010.06a अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः ।

3.010.06c महे वाजाय द्रविणाय दर्शतः ॥

3.010.07a अग्ने यजिष्ठो अध्वरे देवान्देवयते यज ।

3.010.07c होता मन्द्रो वि राजस्यति स्रिधः ॥

3.010.08a स नः पावक दीदिहि द्युमदस्मे सुवीर्यम् ।

3.010.08c भवा स्तोतृभ्यो अन्तमः स्वस्तये ॥

3.010.09a तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते ।

3.010.09c हव्यवाहममर्त्यं सहोवृधम् ॥

3.011.01a अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः ।

3.011.01c स वेद यज्ञमानुषक् ॥

3.011.02a स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः ।

3.011.02c अग्निर्धिया समृण्वति ॥

3.011.03a अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः ।

3.011.03c अर्थं ह्यस्य तरणि ॥

3.011.04a अग्निं सूनुं सनश्रुतं सहसो जातवेदसम् ।

3.011.04c वह्निं देवा अकृण्वत ॥

3.011.05a अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् ।

3.011.05c तूर्णी रथः सदा नवः ॥

3.011.06a साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः ।

3.011.06c अग्निस्तुविश्रवस्तमः ॥

3.011.07a अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः ।

3.011.07c क्षयं पावकशोचिषः ॥

3.011.08a परि विश्वानि सुधिताग्नेरश्याम मन्मभिः ।

3.011.08c विप्रासो जातवेदसः ॥

3.011.09a अग्ने विश्वानि वार्या वाजेषु सनिषामहे ।

3.011.09c त्वे देवास एरिरे ॥

3.012.01a इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम् ।

3.012.01c अस्य पातं धियेषिता ॥

3.012.02a इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।

3.012.02c अया पातमिमं सुतम् ॥

3.012.03a इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे ।

3.012.03c ता सोमस्येह तृम्पताम् ॥

3.012.04a तोशा वृत्रहणा हुवे सजित्वानापराजिता ।

3.012.04c इन्द्राग्नी वाजसातमा ॥

3.012.05a प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।

3.012.05c इन्द्राग्नी इष आ वृणे ॥

3.012.06a इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।

3.012.06c साकमेकेन कर्मणा ॥

3.012.07a इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः ।

3.012.07c ऋतस्य पथ्या३ अनु ॥

3.012.08a इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च ।

3.012.08c युवोरप्तूर्यं हितम् ॥

3.012.09a इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।

3.012.09c तद्वां चेति प्र वीर्यम् ॥

3.013.01a प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै ।

3.013.01c गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ॥

3.013.02a ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः ।

3.013.02c हविष्मन्तस्तमीळते तं सनिष्यन्तोऽवसे ॥

3.013.03a स यन्ता विप्र एषां स यज्ञानामथा हि षः ।

3.013.03c अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ॥

3.013.04a स नः शर्माणि वीतयेऽग्निर्यच्छतु शंतमा ।

3.013.04c यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा ॥

3.013.05a दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः ।

3.013.05c ऋक्वाणो अग्निमिन्धते होतारं विश्पतिं विशाम् ॥

3.013.06a उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः ।

3.013.06c शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥

3.013.07a नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु ।

3.013.07c द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥

3.014.01a आ होता मन्द्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः ।

3.014.01c विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ॥

3.014.02a अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।

3.014.02c विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र ॥

3.014.03a द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ ।

3.014.03c यत्सीमञ्जन्ति पूर्व्यं हविर्भिरा वन्धुरेव तस्थतुर्दुरोणे ॥

3.014.04a मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् ।

3.014.04c यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्सूर्यो नॄन् ॥

3.014.05a वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।

3.014.05c यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥

3.014.06a त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः ।

3.014.06c त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने ॥

3.014.07a तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म ।

3.014.07c त्वं विश्वस्य सुरथस्य बोधि सर्वं तदग्ने अमृत स्वदेह ॥

3.015.01a वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।

3.015.01c सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥

3.015.02a त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।

3.015.02c जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥

3.015.03a त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि ।

3.015.03c वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ॥

3.015.04a अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान् ।

3.015.04c यज्ञस्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्रणीते ॥

3.015.05a अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः ।

3.015.05c रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥

3.015.06a प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे ।

3.015.06c देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ॥

3.015.07a इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।

3.015.07c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

3.016.01a अयमग्निः सुवीर्यस्येशे महः सौभगस्य ।

3.016.01c राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥

3.016.02a इमं नरो मरुतः सश्चता वृधं यस्मिन्रायः शेवृधासः ।

3.016.02c अभि ये सन्ति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ॥

3.016.03a स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य ।

3.016.03c तुविद्युम्न वर्षिष्ठस्य प्रजावतोऽनमीवस्य शुष्मिणः ॥

3.016.04a चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः ।

3.016.04c आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम् ॥

3.016.05a मा नो अग्नेऽमतये मावीरतायै रीरधः ।

3.016.05c मागोतायै सहसस्पुत्र मा निदेऽप द्वेषांस्या कृधि ॥

3.016.06a शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे ।

3.016.06c सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥

3.017.01a समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः ।

3.017.01c शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान् ॥

3.017.02a यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान् ।

3.017.02c एवानेन हविषा यक्षि देवान्मनुष्वद्यज्ञं प्र तिरेममद्य ॥

3.017.03a त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।

3.017.03c ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥

3.017.04a अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः ।

3.017.04c त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ॥

3.017.05a यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता स्वधया च शम्भुः ।

3.017.05c तस्यानु धर्म प्र यजा चिकित्वोऽथ नो धा अध्वरं देववीतौ ॥

3.018.01a भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः ।

3.018.01c पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः ॥

3.018.02a तपो ष्वग्ने अन्तराँ अमित्रान्तपा शंसमररुषः परस्य ।

3.018.02c तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयासः ॥

3.018.03a इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।

3.018.03c यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥

3.018.04a उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः शशमानेषु धेहि ।

3.018.04c रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वं१ भूरि कृत्वः ॥

3.018.05a कृधि रत्नं सुसनितर्धनानां स घेदग्ने भवसि यत्समिद्धः ।

3.018.05c स्तोतुर्दुरोणे सुभगस्य रेवत्सृप्रा करस्ना दधिषे वपूंषि ॥

3.019.01a अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरम् ।

3.019.01c स नो यक्षद्देवताता यजीयान्राये वाजाय वनते मघानि ॥

3.019.02a प्र ते अग्ने हविष्मतीमियर्म्यच्छा सुद्युम्नां रातिनीं घृताचीम् ।

3.019.02c प्रदक्षिणिद्देवतातिमुराणः सं रातिभिर्वसुभिर्यज्ञमश्रेत् ॥

3.019.03a स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।

3.019.03c अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥

3.019.04a भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य यज्यवो जनासः ।

3.019.04c स आ वह देवतातिं यविष्ठ शर्धो यदद्य दिव्यं यजासि ॥

3.019.05a यत्त्वा होतारमनजन्मियेधे निषादयन्तो यजथाय देवाः ।

3.019.05c स त्वं नो अग्नेऽवितेह बोध्यधि श्रवांसि धेहि नस्तनूषु ॥

3.020.01a अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः ।

3.020.01c सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ॥

3.020.02a अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।

3.020.02c तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥

3.020.03a अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।

3.020.03c याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥

3.020.04a अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।

3.020.04c स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणन्तम् ॥

3.020.05a दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम् ।

3.020.05c अश्विना मित्रावरुणा भगं च वसून्रुद्राँ आदित्याँ इह हुवे ॥

3.021.01a इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व ।

3.021.01c स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥

3.021.02a घृतवन्तः पावक ते स्तोका श्चोतन्ति मेदसः ।

3.021.02c स्वधर्मन्देववीतये श्रेष्ठं नो धेहि वार्यम् ॥

3.021.03a तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्य ।

3.021.03c ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भव ॥

3.021.04a तुभ्यं श्चोतन्त्यध्रिगो शचीव स्तोकासो अग्ने मेदसो घृतस्य ।

3.021.04c कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ॥

3.021.05a ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे ।

3.021.05c श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि ॥

3.022.01a अयं सो अग्निर्यस्मिन्सोममिन्द्रः सुतं दधे जठरे वावशानः ।

3.022.01c सहस्रिणं वाजमत्यं न सप्तिं ससवान्सन्स्तूयसे जातवेदः ॥

3.022.02a अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।

3.022.02c येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥

3.022.03a अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये ।

3.022.03c या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥

3.022.04a पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः ।

3.022.04c जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥

3.022.05a इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।

3.022.05c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

3.023.01a निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता ।

3.023.01c जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः ॥

3.023.02a अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम् ।

3.023.02c अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ॥

3.023.03a दश क्षिपः पूर्व्यं सीमजीजनन्सुजातं मातृषु प्रियम् ।

3.023.03c अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी ॥

3.023.04a नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नाम् ।

3.023.04c दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि ॥

3.023.05a इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।

3.023.05c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

3.024.01a अग्ने सहस्व पृतना अभिमातीरपास्य ।

3.024.01c दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥

3.024.02a अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः ।

3.024.02c जुषस्व सू नो अध्वरम् ॥

3.024.03a अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत ।

3.024.03c एदं बर्हिः सदो मम ॥

3.024.04a अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः ।

3.024.04c यज्ञेषु य उ चायवः ॥

3.024.05a अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् ।

3.024.05c शिशीहि नः सूनुमतः ॥

3.025.01a अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः ।

3.025.01c ऋधग्देवाँ इह यजा चिकित्वः ॥

3.025.02a अग्निः सनोति वीर्याणि विद्वान्सनोति वाजममृताय भूषन् ।

3.025.02c स नो देवाँ एह वहा पुरुक्षो ॥

3.025.03a अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः ।

3.025.03c क्षयन्वाजैः पुरुश्चन्द्रो नमोभिः ॥

3.025.04a अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातम् ।

3.025.04c अमर्धन्ता सोमपेयाय देवा ॥

3.025.05a अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः ।

3.025.05c सधस्थानि महयमान ऊती ॥

3.026.01a वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम् ।

3.026.01c सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ॥

3.026.02a तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम् ।

3.026.02c बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदम् ॥

3.026.03a अश्वो न क्रन्दञ्जनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे ।

3.026.03c स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नममृतेषु जागृविः ॥

3.026.04a प्र यन्तु वाजास्तविषीभिरग्नयः शुभे सम्मिश्लाः पृषतीरयुक्षत ।

3.026.04c बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः ॥

3.026.05a अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयम् ।

3.026.05c ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ॥

3.026.06a व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज ईमहे ।

3.026.06c पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः ॥

3.026.07a अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।

3.026.07c अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥

3.026.08a त्रिभिः पवित्रैरपुपोद्ध्यर्कं हृदा मतिं ज्योतिरनु प्रजानन् ।

3.026.08c वर्षिष्ठं रत्नमकृत स्वधाभिरादिद्द्यावापृथिवी पर्यपश्यत् ॥

3.026.09a शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्त्वानाम् ।

3.026.09c मेळिं मदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम् ॥

3.027.01a प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या ।

3.027.01c देवाञ्जिगाति सुम्नयुः ॥

3.027.02a ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् ।

3.027.02c श्रुष्टीवानं धितावानम् ॥

3.027.03a अग्ने शकेम ते वयं यमं देवस्य वाजिनः ।

3.027.03c अति द्वेषांसि तरेम ॥

3.027.04a समिध्यमानो अध्वरे३ऽग्निः पावक ईड्यः ।

3.027.04c शोचिष्केशस्तमीमहे ॥

3.027.05a पृथुपाजा अमर्त्यो घृतनिर्णिक्स्वाहुतः ।

3.027.05c अग्निर्यज्ञस्य हव्यवाट् ॥

3.027.06a तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः ।

3.027.06c आ चक्रुरग्निमूतये ॥

3.027.07a होता देवो अमर्त्यः पुरस्तादेति मायया ।

3.027.07c विदथानि प्रचोदयन् ॥

3.027.08a वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते ।

3.027.08c विप्रो यज्ञस्य साधनः ॥

3.027.09a धि॒या च॑क्रे॒ वरे॑ण्यो भू॒तानां॒ गर्भ॒मा द॑धे ।

3.027.09c दक्ष॑स्य पि॒तरं॒ तना॑ ॥

3.027.10a नि त्वा॑ दधे॒ वरे॑ण्यं॒ दक्ष॑स्ये॒ळा स॑हस्कृत ।

3.027.10c अग्ने॑ सु॒दीतिमु॒शिज॑म् ॥

3.027.11a अ॒ग्निं य॒न्तुर॑म॒प्तुर॑मृ॒तस्य॒ योगे॑ व॒नुषः॑ ।

3.027.11c विप्रा॒ वाजैः॒ समि॑न्धते ॥

3.027.12a ऊ॒र्जो नपा॑तमध्व॒रे दी॑दि॒वांस॒मुप॒ द्यवि॑ ।

3.027.12c अ॒ग्निमी॑ळे क॒विक्र॑तुम् ॥

3.027.13a ई॒ळेन्यो॑ नम॒स्य॑स्ति॒रस्तमां॑सि दर्श॒तः ।

3.027.13c सम॒ग्निरि॑ध्यते॒ वृषा॑ ॥

3.027.14a वृषो॑ अ॒ग्निः समि॑ध्य॒तेऽश्वो॒ न दे॑व॒वाह॑नः ।

3.027.14c तं ह॒विष्म॑न्त ईळते ॥

3.027.15a वृष॑णं त्वा व॒यं वृ॑ष॒न्वृष॑णः॒ समि॑धीमहि ।

3.027.15c अग्ने॒ दीद्य॑तं बृ॒हत् ॥

3.028.01a अग्ने॑ जु॒षस्व॑ नो ह॒विः पु॒रोळा॑शं जातवेदः ।

3.028.01c प्रा॒तः॒सा॒वे धि॑यावसो ॥

3.028.02a पु॒रो॒ळा अ॑ग्ने पच॒तस्तुभ्यं॑ वा घा॒ परि॑ष्कृतः ।

3.028.02c तं जुषस्व यविष्ठ्य ॥

3.028.03a अग्ने वीहि पुरोळाशमाहुतं तिरोअह्न्यम् ।

3.028.03c सहसः सूनुरस्यध्वरे हितः ॥

3.028.04a माध्यंदिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व ।

3.028.04c अग्ने यह्वस्य तव भागधेयं न प्र मिनन्ति विदथेषु धीराः ॥

3.028.05a अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनवाहुतम् ।

3.028.05c अथा देवेष्वध्वरं विपन्यया धा रत्नवन्तममृतेषु जागृविम् ॥

3.028.06a अग्ने वृधान आहुतिं पुरोळाशं जातवेदः ।

3.028.06c जुषस्व तिरोअह्न्यम् ॥

3.029.01a अस्तीदमधिमन्थनमस्ति प्रजननं कृतम् ।

3.029.01c एतां विश्पत्नीमा भराग्निं मन्थाम पूर्वथा ॥

3.029.02a अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ।

3.029.02c दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥

3.029.03a उत्तानायामव भरा चिकित्वान्सद्यः प्रवीता वृषणं जजान ।

3.029.03c अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥

3.029.04a इळायास्त्वा पदे वयं नाभा पृथिव्या अधि ।

3.029.04c जातवेदो नि धीमह्यग्ने हव्याय वोळ्हवे ॥

3.029.05a मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम् ।

3.029.05c यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवम् ॥

3.029.06a यदी मन्थन्ति बाहुभिर्वि रोचतेऽश्वो न वाज्यरुषो वनेष्वा ।

3.029.06c चित्रो न यामन्नश्विनोरनिवृतः परि वृणक्त्यश्मनस्तृणा दहन् ॥

3.029.07a जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः ।

3.029.07c यं देवास ईड्यं विश्वविदं हव्यवाहमदधुरध्वरेषु ॥

3.029.08a सीद होतः स्व उ लोके चिकित्वान्सादया यज्ञं सुकृतस्य योनौ ।

3.029.08c देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥

3.029.09a कृणोत धूमं वृषणं सखायोऽस्रेधन्त इतन वाजमच्छ ।

3.029.09c अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहन्त दस्यून् ॥

3.029.10a अयं ते योनिरृत्वियो यतो जातो अरोचथाः ।

3.029.10c तं जानन्नग्न आ सीदाथा नो वर्धया गिरः ॥

3.029.11a तनूनपादुच्यते गर्भ आसुरो नराशंसो भवति यद्विजायते ।

3.029.11c मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि ॥

3.029.12a सुनिर्मथा निर्मथितः सुनिधा निहितः कविः ।

3.029.12c अग्ने स्वध्वरा कृणु देवान्देवयते यज ॥

3.029.13a अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीळुजम्भम् ।

3.029.13c दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि सं रभन्ते ॥

3.029.14a प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूधनि ।

3.029.14c न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरादजायत ॥

3.029.15a अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद्विदुः ।

3.029.15c द्युम्नवद्ब्रह्म कुशिकास एरिर एकएको दमे अग्निं समीधिरे ॥

3.029.16a यदद्य त्वा प्रयति यज्ञे अस्मिन्होतश्चिकित्वोऽवृणीमहीह ।

3.029.16c ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन्विद्वाँ उप याहि सोमम् ॥

3.030.01a इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि ।

3.030.01c तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः ॥

3.030.02a न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो हरिभ्याम् ।

3.030.02c स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥

3.030.03a इन्द्रः सुशिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिरृघावान् ।

3.030.03c यदुग्रो धा बाधितो मर्त्येषु क्व१ त्या ते वृषभ वीर्याणि ॥

3.030.04a त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः ।

3.030.04c तव द्यावापृथिवी पर्वतासोऽनु व्रताय निमितेव तस्थुः ॥

3.030.05a उताभये पुरुहूत श्रवोभिरेको दृळ्हमवदो वृत्रहा सन् ।

3.030.05c इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते ॥

3.030.06a प्र सू त इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून् ।

3.030.06c जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु ॥

3.030.07a यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यं१ सः ।

3.030.07c भद्रा त इन्द्र सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः ॥

3.030.08a सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक्कुणारुम् ।

3.030.08c अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥

3.030.09a नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ ।

3.030.09c अस्तभ्नाद्द्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः ॥

3.030.10a अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार ।

3.030.10c सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमन्तीः ॥

3.030.11a एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीमुत द्याम् ।

3.030.11c उतान्तरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान् ॥

3.030.12a दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे हर्यश्वप्रसूताः ।

3.030.12c सं यदानळध्वन आदिदश्वैर्विमोचनं कृणुते तत्त्वस्य ॥

3.030.13a दिदृक्षन्त उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकम् ।

3.030.13c विश्वे जानन्ति महिना यदागादिन्द्रस्य कर्म सुकृता पुरूणि ॥

3.030.14a महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः ।

3.030.14c विश्वं स्वाद्म सम्भृतमुस्रियायां यत्सीमिन्द्रो अदधाद्भोजनाय ॥

3.030.15a इन्द्र दृह्य यामकोशा अभूवन्यज्ञाय शिक्ष गृणते सखिभ्यः ।

3.030.15c दुर्मायवो दुरेवा मर्त्यासो निषङ्गिणो रिपवो हन्त्वासः ॥

3.030.16a सं घोषः शृण्वेऽवमैरमित्रैर्जही न्येष्वशनिं तपिष्ठाम् ।

3.030.16c वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन्रन्धयस्व ॥

3.030.17a उद्वृह रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि ।

3.030.17c आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥

3.030.18a स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिष आसत्सि पूर्वीः ।

3.030.18c रायो वन्तारो बृहतः स्यामास्मे अस्तु भग इन्द्र प्रजावान् ॥

3.030.19a आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके ।

3.030.19c ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम् ॥

3.030.20a इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।

3.030.20c स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥

3.030.21a आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यन्तु वाजाः ।

3.030.21c दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघवन्बोधि गोदाः ॥

3.030.22a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.030.22c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.031.01a शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ।

3.031.01c पिता यत्र दुहितुः सेकमृञ्जन्सं शग्म्येन मनसा दधन्वे ॥

3.031.02a न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानम् ।

3.031.02c यदी मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् ॥

3.031.03a अग्निर्जज्ञे जुह्वा३ रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे ।

3.031.03c महान्गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः ॥

3.031.04a अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन् ।

3.031.04c तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः ॥

3.031.05a वीळौ सतीरभि धीरा अतृन्दन्प्राचाहिन्वन्मनसा सप्त विप्राः ।

3.031.05c विश्वामविन्दन्पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ॥

3.031.06a विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः ।

3.031.06c अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥

3.031.07a अगच्छदु विप्रतमः सखीयन्नसूदयत्सुकृते गर्भमद्रिः ।

3.031.07c ससान मर्यो युवभिर्मखस्यन्नथाभवदङ्गिराः सद्यो अर्चन् ॥

3.031.08a सतःसतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हन्ति शुष्णम् ।

3.031.08c प्र णो दिवः पदवीर्गव्युरर्चन्सखा सखीँरमुञ्चन्निरवद्यात् ॥

3.031.09a नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुम् ।

3.031.09c इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ॥

3.031.10a सम्पश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः ।

3.031.10c वि रोदसी अतपद्घोष एषां जाते निष्ठामदधुर्गोषु वीरान् ॥

3.031.11a स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रिया असृजदिन्द्रो अर्कैः ।

3.031.11c उरूच्यस्मै घृतवद्भरन्ती मधु स्वाद्म दुदुहे जेन्या गौः ॥

3.031.12a पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत्सुकृतो वि हि ख्यन् ।

3.031.12c विष्कभ्नन्त स्कम्भनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् ॥

3.031.13a मही यदि धिषणा शिश्नथे धात्सद्योवृधं विभ्वं१ रोदस्योः ।

3.031.13c गिरो यस्मिन्ननवद्याः समीचीर्विश्वा इन्द्राय तविषीरनुत्ताः ॥

3.031.14a मह्या ते सख्यं वश्मि शक्तीरा वृत्रघ्ने नियुतो यन्ति पूर्वीः ।

3.031.14c महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः ॥

3.031.15a महि क्षेत्रं पुरु श्चन्द्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् ।

3.031.15c इन्द्रो नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निम् ॥

3.031.16a अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद्विश्वश्चन्द्राः ।

3.031.16c मध्वः पुनानाः कविभिः पवित्रैर्द्युभिर्हिन्वन्त्यक्तुभिर्धनुत्रीः ॥

3.031.17a अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य मंहना यजत्रे ।

3.031.17c परि यत्ते महिमानं वृजध्यै सखाय इन्द्र काम्या ऋजिप्याः ॥

3.031.18a पतिर्भव वृत्रहन्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः ।

3.031.18c आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ॥

3.031.19a तमङ्गिरस्वन्नमसा सपर्यन्नव्यं कृणोमि सन्यसे पुराजाम् ।

3.031.19c द्रुहो वि याहि बहुला अदेवीः स्वश्च नो मघवन्सातये धाः ॥

3.031.20a मिहः पावकाः प्रतता अभूवन्स्वस्ति नः पिपृहि पारमासाम् ।

3.031.20c इन्द्र त्वं रथिरः पाहि नो रिषो मक्षूमक्षू कृणुहि गोजितो नः ॥

3.031.21a अदेदिष्ट वृत्रहा गोपतिर्गा अन्तः कृष्णाँ अरुषैर्धामभिर्गात् ।

3.031.21c प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोदप स्वाः ॥

3.031.22a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.031.22c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.032.01a इन्द्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत्ते ।

3.032.01c प्रप्रुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व ॥

3.032.02a गवाशिरं मन्थिनमिन्द्र शुक्रं पिबा सोमं ररिमा ते मदाय ।

3.032.02c ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व ॥

3.032.03a ये ते शुष्मं ये तविषीमवर्धन्नर्चन्त इन्द्र मरुतस्त ओजः ।

3.032.03c माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥

3.032.04a त इन्न्वस्य मधुमद्विविप्र इन्द्रस्य शर्धो मरुतो य आसन् ।

3.032.04c येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥

3.032.05a मनुष्वदिन्द्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय ।

3.032.05c स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि ॥

3.032.06a त्वमपो यद्ध वृत्रं जघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ ।

3.032.06c शयानमिन्द्र चरता वधेन वव्रिवांसं परि देवीरदेवम् ॥

3.032.07a यजाम इन्नमसा वृद्धमिन्द्रं बृहन्तमृष्वमजरं युवानम् ।

3.032.07c यस्य प्रिये ममतुर्यज्ञियस्य न रोदसी महिमानं ममाते ॥

3.032.08a इन्द्रस्य कर्म सुकृता पुरूणि व्रतानि देवा न मिनन्ति विश्वे ।

3.032.08c दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यमुषसं सुदंसाः ॥

3.032.09a अद्रोघ सत्यं तव तन्महित्वं सद्यो यज्जातो अपिबो ह सोमम् ।

3.032.09c न द्याव इन्द्र तवसस्त ओजो नाहा न मासाः शरदो वरन्त ॥

3.032.10a त्वं सद्यो अपिबो जात इन्द्र मदाय सोमं परमे व्योमन् ।

3.032.10c यद्ध द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः ॥

3.032.11a अहन्नहिं परिशयानमर्ण ओजायमानं तुविजात तव्यान् ।

3.032.11c न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या३ क्षामवस्थाः ॥

3.032.12a यज्ञो हि त इन्द्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः ।

3.032.12c यज्ञेन यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत् ॥

3.032.13a यज्ञेनेन्द्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्याम् ।

3.032.13c य स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः ॥

3.032.14a विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।

3.032.14c अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥

3.032.15a आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।

3.032.15c समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इन्द्रम् ॥

3.032.16a न त्वा गभीरः पुरुहूत सिन्धुर्नाद्रयः परि षन्तो वरन्त ।

3.032.16c इत्था सखिभ्य इषितो यदिन्द्रा दृळ्हं चिदरुजो गव्यमूर्वम् ॥

3.032.17a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.032.17c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.033.01a प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।

3.033.01c गावेव शुभ्रे मातरा रिहाणे विपाट् छुतुद्री पयसा जवेते ॥

3.033.02a इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः ।

3.033.02c समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥

3.033.03a अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म ।

3.033.03c वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती ॥

3.033.04a एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः ।

3.033.04c न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥

3.033.05a रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।

3.033.05c प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥

3.033.06a इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।

3.033.06c देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥

3.033.07a प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत्।

3.033.07c वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः ॥

3.033.08a एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि।

3.033.08c उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥

3.033.09a ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन।

3.033.09c नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥

3.033.10a आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन।

3.033.10c नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥

3.033.11a यदङ्ग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः।

3.033.11c अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम्॥

3.033.12a अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम्।

3.033.12c प्र पिन्वध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम्॥

3.033.13a उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत।

3.033.13c मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम्॥

3.034.01a इन्द्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून्।

3.034.01c ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे ॥

3.034.02a मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन्।

3.034.02c इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥

3.034.03a इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।

3.034.03c अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥

3.034.04a इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः ।

3.034.04c प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय ॥

3.034.05a इन्द्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि ।

3.034.05c अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम् ॥

3.034.06a महो महानि पनयन्त्यस्येन्द्रस्य कर्म सुकृता पुरूणि ।

3.034.06c वृजनेन वृजिनान्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥

3.034.07a युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।

3.034.07c विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ॥

3.034.08a सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।

3.034.08c ससान यः पृथिवीं द्यामुतेमामिन्द्रं मदन्त्यनु धीरणासः ॥

3.034.09a ससानात्याँ उत सूर्यं ससानेन्द्रः ससान पुरुभोजसं गाम् ।

3.034.09c हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत् ॥

3.034.10a इन्द्र ओषधीरसनोदहानि वनस्पतीँरसनोदन्तरिक्षम् ।

3.034.10c बिभेद वलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनाम् ॥

3.034.11a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.034.11c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.035.01a तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ ।

3.035.01c पिबास्यन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा ररिमा ते मदाय ॥

3.035.02a उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि ।

3.035.02c द्रवद्यथा सम्भृतं विश्वतश्चिदुपेमं यज्ञमा वहात इन्द्रम् ॥

3.035.03a उपो नयस्व वृषणा तपुष्पोतेमव त्वं वृषभ स्वधावः ।

3.035.03c ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः ॥

3.035.04a ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू ।

3.035.04c स्थिरं रथं सुखमिन्द्राधितिष्ठन्प्रजानन्विद्वाँ उप याहि सोमम् ॥

3.035.05a मा ते हरी वृषणा वीतपृष्ठा नि रीरमन्यजमानासो अन्ये ।

3.035.05c अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः ॥

3.035.06a तवायं सोमस्त्वमेह्यर्वाङ्छश्वत्तमं सुमना अस्य पाहि ।

3.035.06c अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥

3.035.07a स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम् ।

3.035.07c तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ॥

3.035.08a इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन् ।

3.035.08c तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या३ अनु स्वाः ॥

3.035.09a याँ आभजो मरुत इन्द्र सोमे ये त्वामवर्धन्नभवन्गणस्ते ।

3.035.09c तेभिरेतं सजोषा वावशानो३ऽग्नेः पिब जिह्वया सोममिन्द्र ॥

3.035.10a इन्द्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र ।

3.035.10c अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व ॥

3.035.11a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.035.11c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.036.01a इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः ।

3.036.01c सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत् ॥

3.036.02a इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः ।

3.036.02c प्रयम्यमानान्प्रति षू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ॥

3.036.03a पिबा वर्धस्व तव घा सुतास इन्द्र सोमासः प्रथमा उतेमे ।

3.036.03c यथापिबः पूर्व्याँ इन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥

3.036.04a महाँ अमत्रो वृजने विरप्श्युग्रं शवः पत्यते धृष्ण्वोजः ।

3.036.04c नाह विव्याच पृथिवी चनैनं यत्सोमासो हर्यश्वममन्दन् ॥

3.036.05a महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन ।

3.036.05c इन्द्रो भगो वाजदा अस्य गावः प्र जायन्ते दक्षिणा अस्य पूर्वीः ॥

3.036.06a प्र यत्सिन्धवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः ।

3.036.06c अतश्चिदिन्द्रः सदसो वरीयान्यदीं सोमः पृणति दुग्धो अंशुः ॥

3.036.07a समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः ।

3.036.07c अंशुं दुहन्ति हस्तिनो भरित्रैर्मध्वः पुनन्ति धारया पवित्रैः ॥

3.036.08a ह्रदा इव कुक्षयः सोमधानाः समी विव्याच सवना पुरूणि ।

3.036.08c अन्ना यदिन्द्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमम् ॥

3.036.09a आ तू भर माकिरेतत्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् ।

3.036.09c इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्र यन्धि ॥

3.036.10a अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ।

3.036.10c अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन् ॥

3.036.11a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.036.11c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.037.01a वार्त्रहत्याय शवसे पृतनाषाह्याय च ।

3.037.01c इन्द्र त्वा वर्तयामसि ॥

3.037.02a अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो ।

3.037.02c इन्द्र कृण्वन्तु वाघतः ॥

3.037.03a नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे ।

3.037.03c इन्द्राभिमातिषाह्ये ॥

3.037.04a पुरुष्टुतस्य धामभिः शतेन महयामसि ।

3.037.04c इन्द्रस्य चर्षणीधृतः ॥

3.037.05a इन्द्रं वृत्राय हन्तवे पुरुहूतमुप ब्रुवे ।

3.037.05c भरेषु वाजसातये ॥

3.037.06a वाजेषु सासहिर्भव त्वामीमहे शतक्रतो ।

3.037.06c इन्द्र वृत्राय हन्तवे ॥

3.037.07a द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवस्सु च ।

3.037.07c इन्द्र साढ्वाभिमातिषु ॥

3.037.08a शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम् ।

3.037.08c इन्द्र सोमं शतक्रतो ॥

3.037.09a इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु ।

3.037.09c इन्द्र तानि त आ वृणे ॥

3.037.10a अगन्निन्द्र श्रवो बृहद्द्युम्नं दधिष्व दुष्टरम् ।

3.037.10c उत्ते शुष्मं तिरामसि ॥

3.037.11a अर्वावतो न आ गह्यथो शक्र परावतः ।

3.037.11c उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ॥

3.038.01a अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः ।

3.038.01c अभि प्रियाणि मर्मृशत्पराणि कवींरिच्छामि संदृशे सुमेधाः ॥

3.038.02a इनोत पृच्छ जनिमा कवीनां मनोधृतः सुकृतस्तक्षत द्याम् ।

3.038.02c इमा उ ते प्रण्यो३ वर्धमाना मनोवाता अध नु धर्मणि ग्मन् ॥

3.038.03a नि षीमिदत्र गुह्या दधाना उत क्षत्राय रोदसी समञ्जन् ।

3.038.03c सं मात्राभिर्ममिरे येमुरुर्वी अन्तर्मही समृते धायसे धुः ॥

3.038.04a आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।

3.038.04c महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥

3.038.05a असूत पूर्वो वृषभो ज्यायानिमा अस्य शुरुधः सन्ति पूर्वीः ।

3.038.05c दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे ॥

3.038.06a त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।

3.038.06c अपश्यमत्र मनसा जगन्वान्व्रते गन्धर्वाँ अपि वायुकेशान् ॥

3.038.07a तदिन्न्वस्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः ।

3.038.07c अन्यदन्यदसुर्यं१ वसाना नि मायिनो ममिरे रूपमस्मिन् ॥

3.038.08a तदिन्न्वस्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत् ।

3.038.08c आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे ॥

3.038.09a युवं प्रत्नस्य साधथो महो यद्दैवी स्वस्तिः परि णः स्यातम् ।

3.038.09c गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यन्ति मायिनः कृतानि ॥

3.038.10a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.038.10c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.039.01a इन्द्रं मतिर्हृद आ वच्यमानाच्छा पतिं स्तोमतष्टा जिगाति ।

3.039.01c या जागृविर्विदथे शस्यमानेन्द्र यत्ते जायते विद्धि तस्य ॥

3.039.02a दिवश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमाना ।

3.039.02c भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः ॥

3.039.03a यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात् ।

3.039.03c वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न एता ॥

3.039.04a नकिरेषां निन्दिता मर्त्येषु ये अस्माकं पितरो गोषु योधाः ।

3.039.04c इन्द्र एषां दृंहिता माहिनावानुद्गोत्राणि ससृजे दंसनावान् ॥

3.039.05a सखा ह यत्र सखिभिर्नवग्वैरभिज्ञ्वा सत्वभिर्गा अनुग्मन् ।

3.039.05c सत्यं तदिन्द्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियन्तम् ॥

3.039.06a इन्द्रो मधु सम्भृतमुस्रियायां पद्वद्विवेद शफवन्नमे गोः ।

3.039.06c गुहा हितं गुह्यं गूळ्हमप्सु हस्ते दधे दक्षिणे दक्षिणावान् ॥

3.039.07a ज्योतिर्वृणीत तमसो विजानन्नारे स्याम दुरितादभीके ।

3.039.07c इमा गिरः सोमपाः सोमवृद्ध जुषस्वेन्द्र पुरुतमस्य कारोः ॥

3.039.08a ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः ।

3.039.08c भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥

3.039.09a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.039.09c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.040.01a इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे ।

3.040.01c स पाहि मध्वो अन्धसः ॥

3.040.02a इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत ।

3.040.02c पिबा वृषस्व तातृपिम् ॥

3.040.03a इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः ।

3.040.03c तिर स्तवान विश्पते ॥

3.040.04a इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते ।

3.040.04c क्षयं चन्द्रास इन्दवः ॥

3.040.05a दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम् ।

3.040.05c तव द्युक्षास इन्दवः ॥

3.040.06a गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे ।

3.040.06c इन्द्र त्वादातमिद्यशः ॥

3.040.07a अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता ।

3.040.07c पीत्वी सोमस्य वावृधे ॥

3.040.08a अर्वावतो न आ गहि परावतश्च वृत्रहन् ।

3.040.08c इमा जुषस्व नो गिरः ॥

3.040.09a यदन्तरा परावतमर्वावतं च हूयसे ।

3.040.09c इन्द्रेह तत आ गहि ॥

3.041.01a आ तू न इन्द्र मद्र्यग्घुवानः सोमपीतये ।

3.041.01c हरिभ्यां याह्यद्रिवः ॥

3.041.02a सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक् ।

3.041.02c अयुज्रन्प्रातरद्रयः ॥

3.041.03a इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद ।

3.041.03c वीहि शूर पुरोळाशम् ॥

3.041.04a रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन् ।

3.041.04c उक्थेष्विन्द्र गिर्वणः ॥

3.041.05a मतयः सोमपामुरुं रिहन्ति शवसस्पतिम् ।

3.041.05c इन्द्रं वत्सं न मातरः ॥

3.041.06a स मन्दस्वा ह्यन्धसो राधसे तन्वा महे ।

3.041.06c न स्तोतारं निदे करः ॥

3.041.07a वयमिन्द्र त्वायवो हविष्मन्तो जरामहे ।

3.041.07c उत त्वमस्मयुर्वसो ॥

3.041.08a मारे अस्मद्वि मुमुचो हरिप्रियार्वाङ्याहि ।

3.041.08c इन्द्र स्वधावो मत्स्वेह ॥

3.041.09a अर्वाञ्चं त्वा सुखे रथे वहतामिन्द्र केशिना ।

3.041.09c घृतस्नू बर्हिरासदे ॥

3.042.01a उप नः सुतमा गहि सोममिन्द्र गवाशिरम् ।

3.042.01c हरिभ्यां यस्ते अस्मयुः ॥

3.042.02a तमिन्द्र मदमा गहि बर्हिष्ठां ग्रावभिः सुतम् ।

3.042.02c कुविन्न्वस्य तृप्णवः ॥

3.042.03a इन्द्रमित्था गिरो ममाच्छागुरिषिता इतः ।

3.042.03c आवृते सोमपीतये ॥

3.042.04a इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे ।

3.042.04c उक्थेभिः कुविदागमत् ॥

3.042.05a इन्द्र सोमाः सुता इमे तान्दधिष्व शतक्रतो ।

3.042.05c जठरे वाजिनीवसो ॥

3.042.06a विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे ।

3.042.06c अधा ते सुम्नमीमहे ॥

3.042.07a इममिन्द्र गवाशिरं यवाशिरं च नः पिब ।

3.042.07c आगत्या वृषभिः सुतम् ॥

3.042.08a तुभ्येदिन्द्र स्व ओक्ये३ सोमं चोदामि पीतये ।

3.042.08c एष रारन्तु ते हृदि ॥

3.042.09a त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे ।

3.042.09c कुशिकासो अवस्यवः ॥

3.043.01a आ याह्यर्वाङुप वन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम् ।

3.043.01c प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते ॥

3.043.02a आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो हरिभ्याम् ।

3.043.02c इमा हि त्वा मतय स्तोमतष्टा इन्द्र हवन्ते सख्यं जुषाणाः ॥

3.043.03a आ नो यज्ञं नमोवृधं सजोषा इन्द्र देव हरिभिर्याहि तूयम् ।

3.043.03c अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनाम् ॥

3.043.04a आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वङ्गा ।

3.043.04c धानावदिन्द्रः सवनं जुषाणः सखा सख्युः शृणवद्वन्दनानि ॥

3.043.05a कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन् ।

3.043.05c कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ॥

3.043.06a आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु ।

3.043.06c प्र ये द्विता दिव ऋञ्जन्त्याताः सुसम्मृष्टासो वृषभस्य मूराः ॥

3.043.07a इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार ।

3.043.07c यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ ॥

3.043.08a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.043.08c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.044.01a अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।

3.044.01c जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् ॥

3.044.02a हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः ।

3.044.02c विद्वाँश्चिकित्वान्हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः ॥

3.044.03a द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम् ।

3.044.03c अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥

3.044.04a जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् ।

3.044.04c हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥

3.044.05a इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् ।

3.044.05c अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥

3.045.01a आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।

3.045.01c मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इहि ॥

3.045.02a वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।

3.045.02c स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळ्हा चिदारुजः ॥

3.045.03a गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गा इव ।

3.045.03c प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥

3.045.04a आ नस्तुजं रयिं भरांशं न प्रतिजानते ।

3.045.04c वृक्षं पक्वं फलमङ्कीव धूनुहीन्द्र सम्पारणं वसु ॥

3.045.05a स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः ।

3.045.05c स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः ॥

3.046.01a युध्मस्य ते वृषभस्य स्वराज उग्रस्य यून स्थविरस्य घृष्वेः ।

3.046.01c अजूर्यतो वज्रिणो वीर्या३णीन्द्र श्रुतस्य महतो महानि ॥

3.046.02a महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान् ।

3.046.02c एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् ॥

3.046.03a प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ।

3.046.03c प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोर्महो अन्तरिक्षादृजीषी ॥

3.046.04a उरुं गभीरं जनुषाभ्युग्रं विश्वव्यचसमवतं मतीनाम् ।

3.046.04c इन्द्रं सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशन्ति ॥

3.046.05a यं सोममिन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया ।

3.046.05c तं ते हिन्वन्ति तमु ते मृजन्त्यध्वर्यवो वृषभ पातवा उ ॥

3.047.01a मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।

3.047.01c आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् ॥

3.047.02a सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।

3.047.02c जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥

3.047.03a उत ऋतुभिर्ऋतुपाः पाहि सोममिन्द्र देवेभिः सखिभिः सुतं नः ।

3.047.03c याँ आभजो मरुतो ये त्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ॥

3.047.04a ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।

3.047.04c ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः ॥

3.047.05a मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।

3.047.05c विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥

3.048.01a सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदन्धसः सुतस्य ।

3.048.01c साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥

3.048.02a यज्जायथास्तदहरस्य कामेंऽशोः पीयूषमपिबो गिरिष्ठाम् ।

3.048.02c तं ते माता परि योषा जनित्री महः पितुर्दम आसिञ्चदग्रे ॥

3.048.03a उपस्थाय मातरमन्नमैट्ट तिग्ममपश्यदभि सोममूधः ।

3.048.03c प्रयावयन्नचरद्गृत्सो अन्यान्महानि चक्रे पुरुधप्रतीकः ॥

3.048.04a उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः ।

3.048.04c त्वष्टारमिन्द्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु ॥

3.048.05a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.048.05c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.049.01a शंसा महामिन्द्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन् ।

3.049.01c यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः ॥

3.049.02a यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम् ।

3.049.02c इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः ॥

3.049.03a सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान् ।

3.049.03c भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः ॥

3.049.04a धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान् ।

3.049.04c क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम् ॥

3.049.05a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.049.05c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.050.01a इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान् ।

3.050.01c ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्व१ः काममृध्याः ॥

3.050.02a आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः ।

3.050.02c इह त्वा धेयुर्हरयः सुशिप्र पिबा त्व१स्य सुषुतस्य चारोः ॥

3.050.03a गोभिर्मिमिक्षुं दधिरे सुपारमिन्द्रं ज्यैष्ठ्याय धायसे गृणानाः ।

3.050.03c मन्दानः सोमं पपिवाँ ऋजीषिन्समस्मभ्यं पुरुधा गा इषण्य ॥

3.050.04a इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।

3.050.04c स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥

3.050.05a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

3.050.05c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

3.051.01a चर्षणीधृतं मघवानमुक्थ्य१मिन्द्रं गिरो बृहतीरभ्यनूषत ।

3.051.01c वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥

3.051.02a शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः ।

3.051.02c वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम् ॥

3.051.03a आकरे वसोर्जरिता पनस्यतेऽनेहस स्तुभ इन्द्रो दुवस्यति ।

3.051.03c विवस्वतः सदन आ हि पिप्रिये सत्रासाहमभिमातिहनं स्तुहि ॥

3.051.04a नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्र वीरमर्चता सबाधः ।

3.051.04c सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे ॥

3.051.05a पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।

3.051.05c इन्द्राय द्याव ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि ॥

3.051.06a तुभ्यं ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।

3.051.06c बोध्या३पिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ॥

3.051.07a इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।

3.051.07c तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥

3.051.08a स वावशान इह पाहि सोमं मरुद्भिरिन्द्र सखिभिः सुतं नः ।

3.051.08c जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे ॥

3.051.09a अप्तूर्ये मरुत आपिरेषोऽमन्दन्निन्द्रमनु दातिवाराः ।

3.051.09c तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे ॥

3.051.10a इदं ह्यन्वोजसा सुतं राधानां पते ।

3.051.10c पिबा त्व१स्य गिर्वणः ॥

3.051.11a यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम् ।

3.051.11c स त्वा ममत्तु सोम्यम् ॥

3.051.12a प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।

3.051.12c प्र बाहू शूर राधसे ॥

3.052.01a धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ।

3.052.01c इन्द्र प्रातर्जुषस्व नः ॥

3.052.02a पुरोळाशं पचत्यं जुषस्वेन्द्रा गुरस्व च ।

3.052.02c तुभ्यं हव्यानि सिस्रते ॥

3.052.03a पुरोळाशं च नो घसो जोषयासे गिरश्च नः ।

3.052.03c वधूयुरिव योषणाम् ॥

3.052.04a पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः ।

3.052.04c इन्द्र क्रतुर्हि ते बृहन् ॥

3.052.05a माध्यंदिनस्य सवनस्य धानाः पुरोळाशमिन्द्र कृष्वेह चारुम् ।

3.052.05c प्र यत्स्तोता जरिता तूर्ण्यर्थो वृषायमाण उप गीर्भिरीट्टे ॥

3.052.06a तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः ।

3.052.06c ऋभुमन्तं वाजवन्तं त्वा कवे प्रयस्वन्त उप शिक्षेम धीतिभिः ॥

3.052.07a पूषण्वते ते चकृमा करम्भं हरिवते हर्यश्वाय धानाः ।

3.052.07c अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥

3.052.08a प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणाम् ।

3.052.08c दिवेदिवे सदृशीरिन्द्र तुभ्यं वर्धन्तु त्वा सोमपेयाय धृष्णो ॥

3.053.01a इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।

3.053.01c वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता ॥

3.053.02a तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि ।

3.053.02c पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्ठया गिरा शचीवः ॥

3.053.03a शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् ।

3.053.03c एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिन्द्राय शस्तम् ॥

3.053.04a जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहन्तु ।

3.053.04c यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥

3.053.05a परा याहि मघवन्ना च याहीन्द्र भ्रातरुभयत्रा ते अर्थम् ।

3.053.05c यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥

3.053.06a अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।

3.053.06c यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥

3.053.07a इमे भोजा अङ्गिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।

3.053.07c विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरन्त आयुः ॥

3.053.08a रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वाम् ।

3.053.08c त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मन्त्रैरनृतुपा ऋतावा ॥

3.053.09a महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिन्धुमर्णवं नृचक्षाः ।

3.053.09c विश्वामित्रो यदवहत्सुदासमप्रियायत कुशिकेभिरिन्द्रः ॥

3.053.10a हंसा इव कृणुथ श्लोकमद्रिभिर्मदन्तो गीर्भिरध्वरे सुते सचा ।

3.053.10c देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ॥

3.053.11a उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुञ्चता सुदासः ।

3.053.11c राजा वृत्रं जङ्घनत्प्रागपागुदगथा यजाते वर आ पृथिव्याः ॥

3.053.12a य इमे रोदसी उभे अहमिन्द्रमतुष्टवम् ।

3.053.12c विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् ॥

3.053.13a विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे ।

3.053.13c करदिन्नः सुराधसः ॥

3.053.14a किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् ।

3.053.14c आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः ॥

3.053.15a ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता ।

3.053.15c आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम् ॥

3.053.16a ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पाञ्चजन्यासु कृष्टिषु ।

3.053.16c सा पक्ष्या३ नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ॥

3.053.17a स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि ।

3.053.17c इन्द्रः पातल्ये ददतां शरीतोररिष्टनेमे अभि नः सचस्व ॥

3.053.18a बलं धेहि तनूषु नो बलमिन्द्रानळुत्सु नः ।

3.053.18c बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥

3.053.19a अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् ।

3.053.19c अक्ष वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ॥

3.053.20a अयमस्मान्वनस्पतिर्मा च हा मा च रीरिषत् ।

3.053.20c स्वस्त्या गृहेभ्य आवसा आ विमोचनात् ॥

3.053.21a इन्द्रोतिभिर्बहुलाभिर्नो अद्य याच्छ्रेष्ठाभिर्मघवञ्छूर जिन्व ।

3.053.21c यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु ॥

3.053.22a परशुं चिद्वि तपति शिम्बलं चिद्वि वृश्चति ।

3.053.22c उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति ॥

3.053.23a न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः ।

3.053.23c नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान्नयन्ति ॥

3.053.24a इम इन्द्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वम् ।

3.053.24c हिन्वन्त्यश्वमरणं न नित्यं ज्यावाजं परि णयन्त्याजौ ॥

3.054.01a इमं महे विदथ्याय शूषं शश्वत्कृत्व ईड्याय प्र जभ्रुः ।

3.054.01c शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः ॥

3.054.02a महि महे दिवे अर्चा पृथिव्यै कामो म इच्छञ्चरति प्रजानन् ।

3.054.02c ययोर्ह स्तोमे विदथेषु देवाः सपर्यवो मादयन्ते सचायोः ॥

3.054.03a युवोरृतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतम् ।

3.054.03c इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नम् ॥

3.054.04a उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः ।

3.054.04c नरश्चिद्वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः ॥

3.054.05a को अद्धा वेद क इह प्र वोचद्देवाँ अच्छा पथ्या३ का समेति ।

3.054.05c ददृश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥

3.054.06a कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदन्ती ।

3.054.06c नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥

3.054.07a समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके ।

3.054.07c उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ॥

3.054.08a विश्वेदेते जनिमा सं विविक्तो महो देवान्बिभ्रती न व्यथेते ।

3.054.08c एजद्ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातम् ॥

3.054.09a सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः ।

3.054.09c देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरन्तः ॥

3.054.10a इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृण्वन्नग्निजिह्वाः ।

3.054.10c मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ॥

3.054.11a हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः ।

3.054.11c देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ॥

3.054.12a सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् ।

3.054.12c पूषण्वन्त ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ॥

3.054.13a विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः ।

3.054.13c सरस्वती शृणवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ॥

3.054.14a विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् ।

3.054.14c उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः ॥

3.054.15a इन्द्रो विश्वैर्वीर्यै३ः पत्यमान उभे आ पप्रौ रोदसी महित्वा ।

3.054.15c पुरंदरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरि पश्वः ॥

3.054.16a नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोश्चारु नाम ।

3.054.16c युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ॥

3.054.17a महत्तद्वः कवयश्चारु नाम यद्ध देवा भवथ विश्व इन्द्रे ।

3.054.17c सख ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः ॥

3.054.18a अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रतानि ।

3.054.18c युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः ॥

3.054.19a देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता ।

3.054.19c शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्व१न्तरिक्षम् ॥

3.054.20a शृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः ।

3.054.20c आदित्यैर्नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ॥

3.054.21a सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।

3.054.21c भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥

3.054.22a स्वदस्व हव्या समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि ।

3.054.22c विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिही नः ॥

3.055.01a उषसः पूर्वा अध यद्व्यूषुर्महद्वि जज्ञे अक्षरं पदे गोः ।

3.055.01c व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकम् ॥

3.055.02a मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितरः पदज्ञाः ।

3.055.02c पुराण्योः सद्मनोः केतुरन्तर्महद्देवानामसुरत्वमेकम् ॥

3.055.03a वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीद्ये पूर्व्याणि ।

3.055.03c समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ॥

3.055.04a समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु ।

3.055.04c अन्या वत्सं भरति क्षेति माता महद्देवानामसुरत्वमेकम् ॥

3.055.05a आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वन्तः ।

3.055.05c अन्तर्वतीः सुवते अप्रवीता महद्देवानामसुरत्वमेकम् ॥

3.055.06a शयुः परस्तादध नु द्विमाताबन्धनश्चरति वत्स एकः ।

3.055.06c मित्रस्य ता वरुणस्य व्रतानि महद्देवानामसुरत्वमेकम् ॥

3.055.07a द्विमाता होता विदथेषु सम्राळन्वग्रं चरति क्षेति बुध्नः ।

3.055.07c प्र रण्यानि रण्यवाचो भरन्ते महद्देवानामसुरत्वमेकम् ॥

3.055.08a शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वमायत् ।

3.055.08c अन्तर्मतिश्चरति निष्षिधं गोर्महद्देवानामसुरत्वमेकम् ॥

3.055.09a नि वेवेति पलितो दूत आस्वन्तर्महाँश्चरति रोचनेन ।

3.055.09c वपूंषि बिभ्रदभि नो वि चष्टे महद्देवानामसुरत्वमेकम् ॥

3.055.10a विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः ।

3.055.10c अग्निष्टा विश्वा भुवनानि वेद महद्देवानामसुरत्वमेकम् ॥

3.055.11a नाना चक्राते यम्या३ वपूंषि तयोरन्यद्रोचते कृष्णमन्यत् ।

3.055.11c श्यावी च यदरुषी च स्वसारौ महद्देवानामसुरत्वमेकम् ॥

3.055.12a माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची ।

3.055.12c ऋतस्य ते सदसीळे अन्तर्महद्देवानामसुरत्वमेकम् ॥

3.055.13a अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ।

3.055.13c ऋतस्य सा पयसापिन्वतेळा महद्देवानामसुरत्वमेकम् ॥

3.055.14a पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा ।

3.055.14c ऋतस्य सद्म वि चरामि विद्वान्महद्देवानामसुरत्वमेकम् ॥

3.055.15a पदे इव निहिते दस्मे अन्तस्तयोरन्यद्गुह्यमाविरन्यत् ।

3.055.15c सध्रीचीना पथ्या३ सा विषूची महद्देवानामसुरत्वमेकम् ॥

3.055.16a आ धेनवो धुनयन्तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः ।

3.055.16c नव्यानव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम् ॥

3.055.17a यदन्यासु वृषभो रोरवीति सो अन्यस्मिन्यूथे नि दधाति रेतः ।

3.055.17c स हि क्षपावान्स भगः स राजा महद्देवानामसुरत्वमेकम् ॥

3.055.18a वीरस्य नु स्वश्व्यं जनासः प्र नु वोचाम विदुरस्य देवाः ।

3.055.18c षोळ्हा युक्ताः पञ्चपञ्चा वहन्ति महद्देवानामसुरत्वमेकम् ॥

3.055.19a देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान ।

3.055.19c इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम् ॥

3.055.20a मही समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे ।

3.055.20c शृण्वे वीरो विन्दमानो वसूनि महद्देवानामसुरत्वमेकम् ॥

3.055.21a इमां च नः पृथिवीं विश्वधाया उप क्षेति हितमित्रो न राजा ।

3.055.21c पुरःसदः शर्मसदो न वीरा महद्देवानामसुरत्वमेकम् ॥

3.055.22a निष्षिध्वरीस्त ओषधीरुतापो रयिं त इन्द्र पृथिवी बिभर्ति ।

3.055.22c सखायस्ते वामभाजः स्याम महद्देवानामसुरत्वमेकम् ॥

3.056.01a न ता मिनन्ति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि ।

3.056.01c न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ॥

3.056.02a षड्भाराँ एको अचरन्बिभर्त्यृतं वर्षिष्ठमुप गाव आगुः ।

3.056.02c तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ॥

3.056.03a त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।

3.056.03c त्र्यनीकः पत्यते माहिनावान्स रेतोधा वृषभः शश्वतीनाम् ॥

3.056.04a अभीक आसां पदवीरबोध्यादित्यानामह्वे चारु नाम ।

3.056.04c आपश्चिदस्मा अरमन्त देवीः पृथग्व्रजन्तीः परि षीमवृञ्जन् ॥

3.056.05a त्री षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट् ।

3.056.05c ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः ॥

3.056.06a त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः ।

3.056.06c त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः ॥

3.056.07a त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणी ।

3.056.07c आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षन्त सवितुः सवाय ॥

3.056.08a त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः ।

3.056.08c ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे सन्तु देवाः ॥

3.057.01a प्र मे विविक्वाँ अविदन्मनीषां धेनुं चरन्तीं प्रयुतामगोपाम् ।

3.057.01c सद्यश्चिद्या दुदुहे भूरि धासेरिन्द्रस्तदग्निः पनितारो अस्याः ॥

3.057.02a इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे ।

3.057.02c विश्वे यदस्यां रणयन्त देवाः प्र वोऽत्र वसवः सुम्नमश्याम् ॥

3.057.03a या जामयो वृष्ण इच्छन्ति शक्तिं नमस्यन्तीर्जानते गर्भमस्मिन् ।

3.057.03c अच्छा पुत्रं धेनवो वावशाना महश्चरन्ति बिभ्रतं वपूंषि ॥

3.057.04a अच्छा विवक्मि रोदसी सुमेके ग्राव्णो युजानो अध्वरे मनीषा ।

3.057.04c इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवन्ति दर्शता यजत्राः ॥

3.057.05a या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची ।

3.057.05c तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि ॥

3.057.06a या ते अग्ने पर्वतस्येव धारासश्चन्ती पीपयद्देव चित्रा ।

3.057.06c तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्याम् ॥

3.058.01a धेनुः प्रत्नस्य काम्यं दुहानान्तः पुत्रश्चरति दक्षिणायाः ।

3.058.01c आ द्योतनिं वहति शुभ्रयामोषस स्तोमो अश्विनावजीगः ॥

3.058.02a सुयुग्वहन्ति प्रति वामृतेनोर्ध्वा भवन्ति पितरेव मेधाः ।

3.058.02c जरेथामस्मद्वि पणेर्मनीषां युवोरवश्चकृमा यातमर्वाक् ॥

3.058.03a सुयुग्भिरश्वैः सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।

3.058.03c किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥

3.058.04a आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवन्ते ।

3.058.04c इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे ॥

3.058.05a तिरः पुरू चिदश्विना रजांस्याङ्गूषो वां मघवाना जनेषु ।

3.058.05c एह यातं पथिभिर्देवयानैर्दस्राविमे वां निधयो मधूनाम् ॥

3.058.06a पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्याम् ।

3.058.06c पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः ॥

3.058.07a अश्विना वायुना युवं सुदक्षा नियुद्भिष्च सजोषसा युवाना ।

3.058.07c नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रिधा सुदानू ॥

3.058.08a अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः ।

3.058.08c रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥

3.058.09a अश्विना मधुषुत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे ।

3.058.09c रथो ह वां भूरि वर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः ॥

3.059.01a मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् ।

3.059.01c मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥

3.059.02a प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ।

3.059.02c न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥

3.059.03a अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः ।

3.059.03c आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ॥

3.059.04a अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः ।

3.059.04c तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥

3.059.05a महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः ।

3.059.05c तस्मा एतत्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत ॥

3.059.06a मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि ।

3.059.06c द्युम्नं चित्रश्रवस्तमम् ॥

3.059.07a अभि यो महिना दिवं मित्रो बभूव सप्रथाः ।

3.059.07c अभि श्रवोभिः पृथिवीम् ॥

3.059.08a मित्राय पञ्च येमिरे जना अभिष्टिशवसे ।

3.059.08c स देवान्विश्वान्बिभर्ति ॥

3.059.09a मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे ।

3.059.09c इष इष्टव्रता अकः ॥

3.060.01a इहेह वो मनसा बन्धुता नर उशिजो जग्मुरभि तानि वेदसा ।

3.060.01c याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं भागमानश ॥

3.060.02a याभिः शचीभिश्चमसाँ अपिंशत यया धिया गामरिणीत चर्मणः ।

3.060.02c येन हरी मनसा निरतक्षत तेन देवत्वमृभवः समानश ॥

3.060.03a इन्द्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे ।

3.060.03c सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः सुकृतः सुकृत्यया ॥

3.060.04a इन्द्रेण याथ सरथं सुते सचाँ अथो वशानां भवथा सह श्रिया ।

3.060.04c न वः प्रतिमै सुकृतानि वाघतः सौधन्वना ऋभवो वीर्याणि च ॥

3.060.05a इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।

3.060.05c धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥

3.060.06a इन्द्र ऋभुमान्वाजवान्मत्स्वेह नोऽस्मिन्सवने शच्या पुरुष्टुत ।

3.060.06c इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ॥

3.060.07a इन्द्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियम् ।

3.060.07c शतं केतेभिरिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि ॥

3.061.01a उषो वाजेन वाजिनि प्रचेता स्तोमं जुषस्व गृणतो मघोनि ।

3.061.01c पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे ॥

3.061.02a उषो देव्यमर्त्या वि भाहि चन्द्ररथा सूनृता ईरयन्ती ।

3.061.02c आ त्वा वहन्तु सुयमासो अश्वा हिरण्यवर्णां पृथुपाजसो ये ॥

3.061.03a उषः प्रतीची भुवनानि विश्वोर्ध्वा तिष्ठस्यमृतस्य केतुः ।

3.061.03c समानमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व ॥

3.061.04a अव स्यूमेव चिन्वती मघोन्युषा याति स्वसरस्य पत्नी ।

3.061.04c स्व१र्जनन्ती सुभगा सुदंसा आन्ताद्दिवः पप्रथ आ पृथिव्याः ॥

3.061.05a अच्छा वो देवीमुषसं विभातीं प्र वो भरध्वं नमसा सुवृक्तिम् ।

3.061.05c ऊर्ध्वं मधुधा दिवि पाजो अश्रेत्प्र रोचना रुरुचे रण्वसंदृक् ॥

3.061.06a ऋतावरी दिवो अर्कैरबोध्या रेवती रोदसी चित्रमस्थात् ।

3.061.06c आयतीमग्न उषसं विभातीं वाममेषि द्रविणं भिक्षमाणः ॥

3.061.07a ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी आ विवेश ।

3.061.07c मही मित्रस्य वरुणस्य माया चन्द्रेव भानुं वि दधे पुरुत्रा ॥

3.062.01a इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन् ।

3.062.01c क्व१ त्यदिन्द्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः ॥

3.062.02a अयमु वां पुरुतमो रयीयञ्छश्वत्तममवसे जोहवीति ।

3.062.02c सजोषाविन्द्रावरुणा मरुद्भिर्दिवा पृथिव्या शृणुतं हवं मे ॥

3.062.03a अस्मे तदिन्द्रावरुणा वसु ष्यादस्मे रयिर्मरुतः सर्ववीरः ।

3.062.03c अस्मान्वरूत्रीः शरणैरवन्त्वस्मान्होत्रा भारती दक्षिणाभिः ॥

3.062.04a बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य ।

3.062.04c रास्व रत्नानि दाशुषे ॥

3.062.05a शुचिमर्कैर्बृहस्पतिमध्वरेषु नमस्यत ।

3.062.05c अनाम्योज आ चके ॥

3.062.06a वृषभं चर्षणीनां विश्वरूपमदाभ्यम् ।

3.062.06c बृहस्पतिं वरेण्यम् ॥

3.062.07a इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी ।

3.062.07c अस्माभिस्तुभ्यं शस्यते ॥

3.062.08a तां जुषस्व गिरं मम वाजयन्तीमवा धियम् ।

3.062.08c वधूयुरिव योषणाम् ॥

3.062.09a यो विश्वाभि विपश्यति भुवना सं च पश्यति ।

3.062.09c स नः पूषाविता भुवत् ॥

3.062.10a तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

3.062.10c धियो यो नः प्रचोदयात् ॥

3.062.11a देवस्य सवितुर्वयं वाजयन्तः पुरंध्या ।

3.062.11c भगस्य रातिमीमहे ॥

3.062.12a देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः ।

3.062.12c नमस्यन्ति धियेषिताः ॥

3.062.13a सोमो जिगाति गातुविद्देवानामेति निष्कृतम् ।

3.062.13c ऋतस्य योनिमासदम् ॥

3.062.14a सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे ।

3.062.14c अनमीवा इषस्करत् ॥

3.062.15a अस्माकमायुर्वर्धयन्नभिमातीः सहमानः ।

3.062.15c सोमः सधस्थमासदत् ॥

3.062.16a आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।

3.062.16c मध्वा रजांसि सुक्रतू ॥

3.062.17a उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः ।

3.062.17c द्राघिष्ठाभिः शुचिव्रता ॥

3.062.18a गृणाना जमदग्निना योनावृतस्य सीदतम् ।

3.062.18c पातं सोममृतावृधा ॥

Notes by Detlef Eichler (detlefeichler@googlemail.com):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This Devanāgarī version of Rigveda is from an ITRANS file which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The font used for the Rigveda text is Ancient Sanskrit 99. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (1.001.01a) the font Times New Roman is used.

4. Last updated: 19 May 2010